**क्रोष्टुपुच्छी** स्त्री क्रोष्टोः पुच्छमिव पुच्छमस्याः ङीष्। पृश्निपर्ण्याम् (चाकुलिया) शब्दरत्ना०

**क्रोष्टुफल** पु० क्रोष्टोः प्रियं फलमस्य। इङ्गुदीवृक्षे राजनि०

**क्रोष्टुविन्ना** स्त्री क्रोष्टुना विन्ना प्राप्ता पुच्छाकारेण ३त०। पृश्निपर्ण्याम् (चाकुलिया) अमरः। (शिरालछाञ्जि) २वृक्षे भरतः।

**क्रोष्टेक्षु** पु० क्रोष्टुः प्रिय इक्षुः पृषो०। श्वेतेक्षौ राजनि०

**क्रोष्ट्री** स्त्री क्रोष्टुजातिस्त्री क्रोष्टुस्तृज्वत् ऋदन्तत्वात् ङीप्। १शृगालजातिस्त्रियाम् तत्प्रियत्वात् २श्वेतभूमिकुष्माण्डे अमरः। ३कृष्णविदार्य्यां ४लाङ्गल्याम् च मेदि०

**क्रौञ्च** पुंस्त्री० क्रुञ्च्+स्वार्थे प्रज्ञा० अण्। (कोँचवक) बकभेदे स्त्रियाम् अणन्तत्वात् ङीप्। "निशम्य रुदतीं क्रौञ्चीम्" रामा०बा०२अ०। स्त्रियां टाप् इति वदन् भरतश्चिन्त्यः। अजादिषु क्रुञ्चशब्दस्यैव पाठात् तदप्रवृत्तेः। २हिमवतः पौत्रे पर्व्वतभेदे "धनुर्विकृष्य व्यसृजद्बाणान् श्वेते महागिरौ। बिभेद स (कार्त्तिकेयः) शरैः शैलं क्रौञ्चं हिमवतः सुतम्" भा० व० २२४अ०। तस्य हिमवत्पौत्रत्वेऽपि सन्तानाभिप्रायेण सुतत्वोक्तिः। तस्य हिमवत्पुत्रमैनाकपुत्रत्वं हरिवं० १८अ० उक्तं यथा "एतेषां मानसी कन्या मेना नाम महागिरेः। पत्नी हिमवतः श्रेष्ठा यस्यां मैनाक उच्यते। मैनाकस्य सुतः श्रीमान् क्रौञ्चोनाम महागिरिः। पर्व्वतप्रवरः पुत्रो नानारत्नसमन्वितः"। ३द्वीपभेदे ४असुरभेदे। "क्रौञ्चे (द्वीपे) क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे। स्कन्देन युद्धा सुचिरं चित्रमायी सुमायिना। स शैलस्तस्य दैत्यस्य ख्यातश्चित्रेण कर्म्मणा। केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते" मृगेन्द्रसंहिता। क्रौञ्चदैत्यस्य मयदानवपुत्रः यथाह हरि० ४७अ० "मयो ददर्श मायावी दानवान्दिवि दानवः। स शिलाजालविततां गण्डशैलाट्टहासिनीम्। पादपोत्कृष्टकूटाग्रां कन्दराकीर्णकाननाम् सिंहव्याघ्रगणाकीर्णां नदन्तीं दैत्ययूथपैः। ईहामृगगणाकीर्णां पवनाघूर्णितद्रुमाम्। निर्म्मितां स्वेन पुत्रेण क्रौञ्चेन दिवि कामगाम्। प्रथितां पार्व्वतीं मायां ससृजे स समन्ततः"। "षण्मुखचरितमिव श्रूयमाणक्रौञ्चवनिताप्रलापम्, काद० ५कुररीखगे राजनि०। ६अर्हतां ध्वजभेदे ७राक्षसभेदे च पु० हेम०। क्रौञ्चद्वीपस्थानञ्च "भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः। अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः" इत्युपक्रमे जम्बुद्वीपमुक्त्वा। "शाकं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपुष्करे च। द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति" सि०शि० उक्तम्। तद्वृत्तिः विष्णुपु० "घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः। क्रौञ्चद्वीपो महाभाग। श्रूयताञ्चापरो महान्। कुशद्वीपस्य विस्ताराद् द्विगुणो यस्य विस्तरः। क्रौञ्चद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः। तन्नामानि च वर्षाणि तेषाञ्चक्रे महीपतिः। कुशलो मन्दगश्चोष्णः पीवरोऽथान्धकारकः। मुनिश्च दुन्दुभिश्चैव सप्तैते तत्सुता मुने!। तत्रापि देवगन्धर्व्वसेविताः सुमनोरमाः। वर्षाचला महाबुद्धे! तेषां नामानि मे शृणु। क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः। चतुर्थो हरशैलश्च स्वभाभिर्भासयन्नभः। देवावृत् पञ्चमश्चैव तथान्यः पुण्डरीकवान्। दुन्दुभिश्च महाक्रौञ्चो द्विगुणास्ते परस्परम्। द्वीपा द्वीपेषु ये शैला यथा द्वीपानि ते तथा। वर्षेष्वेतेषु रम्येषु वर्षशैलवरेषु च। निवसन्ति निरातङ्काः सह देवगणैः प्रजाः। पुष्कराः पुष्कला धन्यास्तिष्याख्याश्च महामुने!। ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चानुक्रमोदिताः। तैस्तत्र नद्यो मैत्रेय! याः पीयन्ते शृणुष्व ताः। सप्त प्रधाना शतशस्तथान्याः क्षुद्रनिम्नगाः। गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा। ख्यातिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः। तत्रापि वर्णैर्भगवान् पुष्कराद्यैर्जनार्द्दनः। योगी रुद्रस्वरूपस्तु इज्यते यज्ञसन्निधौ। क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च। आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः। दधिमण्डोदकस्यापि शाकद्वीपेन संवृतः। क्रौञ्चद्वीपस्य विस्ताराद्द्विगुणेन महामते!"। "तथा वहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तः। इतो यथा कुशद्वीपो घृतोदेन। यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वर्त्तक आस्ते। योऽसौ गुहप्रहरणोन्मथितस्वकुञ्जोऽपि क्षीरोदेनाभिषिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो वभूव। तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान्निवेश्य स्वयं भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम। आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः। तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपवर्हणो नन्दो नन्दनः सर्वतोभद्र इति। अभया